निलसलिलव्योमतेजोमयोऽयम् । नान्याधारः स्वशक्त्यैव वियति नियतं तिष्ठतीहास्य पृष्ठे निष्ठं विश्वं च शश्वत्सदनुजमनुजादित्यदैत्यं समन्तात् । सर्वतः पर्वतारामग्रामचैत्यचयैश्चितः । कदम्बकुसुमग्रन्थिः केसरप्रकरैरिव । यथोष्णतार्कानलयोश्च, शीतता विधौ, द्रुतिः के, कठिनत्वमश्मनि । मरुच्चलो भूरचला स्वभावतो यतो विचित्रा वत वस्तुशक्तयः । आकृष्टशक्तिश्च मही तया यत् खस्थं गुरु स्वाभिमुखं स्वशक्त्या । आकृष्यते तत्पततीव भाति समे समन्तात् क्व ? पतत्वियं खे" इति । आर्य्यभट्टमते तु अस्याश्चलत्वेऽपि अचलाः पर्वताः सन्त्यत्र अस्त्यर्थेऽचि । अचलवत्त्वात् स्वकक्षातो वहिर्गमनाभावाद्वा अचलत्वम् । तेन च तस्याश्चलत्वं दृष्टान्तविधयोक्तं तच्च विस्तरतो भूगोलशब्दे वक्ष्यते । चलनशून्ये त्रि० "तस्मात्त्वमचलोभवेति" कलसस्थापनमन्त्रः । "तस्मान्मम गृहे नित्यं लक्ष्मि ! त्वमचला भवेति" पुरा० । "समाधावचला बुद्धिरिति, गीता, अचला भक्तिरीश्वरे" इति पुरा० । न चलति स्वभावात् । शिवे पु० तस्य स्थाणुत्वात् तथात्वम् । ब्रह्मणि न० । "निष्कलं निष्क्रियं शान्तमिति" श्रुत्या अस्य सर्वक्रियाशून्यत्वोक्तेरचलत्वम् । आत्मनि पु० "नित्यः सर्वगतः स्थाणुरचलोऽयं सनातन" इति गीता ।

**अचलकन्या** स्त्री अचलस्य हिमाचलस्य कन्या । पार्वत्यां, सा हि हिमाचलेन मेनायामुत्पादिता । तत्कथा च "प्रसूतिरभवत्तस्य मेनायाः कन्यका सुतेति" शिवपुराणे प्रपञ्चेन दर्शिता । तन्मूलं कुमारे चोक्तम् "अथावमानेन पितुः प्रयुक्ता दक्षस्य कन्या भवपूर्व्वपत्नी । सती सती योगविसृष्टदेहा तां जन्मने शैलवधूं प्रपेदे । सा भूधराणामधिपेन तस्यां समाधिमत्यामुदपादि भव्येति" इति अचलसुतादयोऽप्यत्र ।

**अचलकीला** स्त्री अचलाः कीला इव यस्याः । पृथिव्याम् । अचलस्य सुमेरोः कील इव, अचलः कीलइवावष्टम्भकत्वाद्वा । विष्कम्भपर्वतेषु मन्दरादिषु पु० । ते च सुमेरुमुपवर्ण्य, "विष्कम्भशैलाः खलु मन्दरोऽस्य सुगन्धशैलो विपुलः सुपार्श्व इति" सि० शि० गो० दर्शितास्तेषां स्वरूपादि तत्तच्छब्दे वक्ष्यते ।

**अचलजा** स्त्री अचलात् हिमालयात् जायते जन-ड ५त० । पार्व्वत्यां, तत्कथा पूर्व्वशब्दे उक्ता । पर्वतजातमात्रे त्रि० अचलजातादयोऽप्यत्र ।

**अचलत्विष्** पु० अचला बहुप्रक्षालनेनापि मालिन्यानपगमात् स्थिरा त्विट् कान्तिर्यस्य । कोकिले । स्थिरकान्तिमति त्रि० । कर्म्मधा० । स्थिरायां कान्तौ स्त्री ।

**अचलद्विष्** पु० अचलेभ्यः द्वेष्टि द्विष-क्विप् ४त० । इन्द्रे तस्य ह्यचलपक्षच्छेदकत्वात्तथात्वं तत्कथा गोत्रभिच्छब्दे वक्ष्यते । अचलरिपादयोऽप्यत्र पु० । पर्व्वतजाते त्रि० ।

**अचलपति** पु० ६त० । हिमाचले । यथा तस्य तत्पतित्वं तथाचलराजशब्दे वक्ष्यते ।

**अचलभ्राट** पु० बौद्धभेदे ।

**अचलराज** पु० अचलानां राजा अच् समा० । हिमाचले "शैलानां हिमवन्तं च नदीनाञ्चैव सागरम् । गन्धर्व्वाणामधिपतिं चक्रे चित्ररथं विधिरिति" ब्रह्मपुराणे तस्याचलराजत्वमुक्तम् अचलाधिपादयोऽप्यत्र ।

**अचापल** न० चपलस्य भावः अण् न०त० । चाञ्चल्यविरोधिस्थिरतायाम् । ब० । चाञ्चल्यशून्ये स्थिरे त्रि० ।

**अचापल्य** न० चपलस्य भावः ष्यञ् न० त० । चाञ्चल्य विरोधिस्थिरतायाम् व० । ब० । चाञ्चल्यशून्ये त्रि० ।

**अचिक्कण** त्रि० न चिक्कणः । चिक्कणताविरोधिरूक्षत्ववति ।

**अचित्त** त्रि० नास्ति चित्तं यस्य । चित्तशून्ये चेतनारहिते "अचित्तहस्तिधेनोष्ठगिति" अचित्ताद्देशकालाट्ठगिति" च पा० । स्थावरादीनान्तु न चित्तशून्यत्वं किन्तु विशिष्टचेतनाराहित्यमेवेति अचेतनशब्दे वक्ष्यते ।

**अचिन्तनीय** त्रि० चिन्तयितुं अनुमापकहेत्वभावेन तर्कयितुमशक्यः चिति—शक्यार्थे कर्म्मणि अनीयर् न०त० । अनुमापकहेत्वभावेन तर्कयितुमशक्ये । "अचिन्तनीयस्तु तव प्रभाव इति" रघु० । तदर्थे यत् । अचिन्त्योऽप्युक्तार्थे त्रि० "अचिन्त्याव्यक्तरूपाय निर्गुणाय गुणात्मने समस्तजगदाधारमूर्त्तये ब्रह्मणे नमः" इति सूर्य्य० ।

**अचिन्तित** त्रि० न चिन्तितः । पूर्व्वरूपादिकारणानुसन्धानादिकमन्तरेण अतर्किते "विधेर्नियोगादेतन्मे अचिन्तितमुपस्थितमिति" पुरा० ।

**अचिर** न० न चिरम् । अल्पकाले, अल्पकालस्थायिनि वस्तुमात्रे त्रि० । "अचिरेणैव कालेन वंशनाशो भवेद्ध्रुवमिति पुरा० । अचिरांशुः अचिरप्रभा अचिरद्युतिः ।

**अचिरत्विष्** स्त्री अचिरा अल्पकालस्थायिनी त्विट् कान्तिरस्याः । विद्युति । अल्पकालकान्तियुक्ते त्रि० ।

**अचिरद्युतिः** स्त्री अचिरा अल्पकालस्थायिनी द्युतिर्यस्याः । विद्युति । अल्पकालस्थायिद्युतिमति त्रि० । कर्म्म० । अल्पकालस्थायिन्यां कान्तौ स्त्री ।